दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

पञ्चाङ्गम्
अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ वसन्त-ऋतुः
सूर्यः उत्तरायणः फाल्गुणः शुक्लचतुर्थी
तिथिः फाल्गुणः 20 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-123 | 1 | मार्च 03, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 हिमाचलकांग्रेस २० दिवसेषु काङ्ग्रेसस्य नवीनसङ्गटनस्य निर्माणं भविष्यति,नवीनेभ्यः अवसरं दास्यते

3 सिङ्गापुरस्य शिक्षाव्यवस्थायाः विषये ज्ञात्वा अन्ताराष्ट्रीय-संपर्कन-भ्रमणात् प्रत्यागताः हिमाचलप्रदेशस्य शिक्षकाः

5 व्याकरणं सर्वेषु शास्त्रेषु पवित्रतमं सर्वशास्त्रोपकारकं च वर्त्तते- आचार्यः राधाबल्लभत्रिपाठी

## न्यूज़ीलैंडदलं 44 धावनांकैः पराजित्य स्वसमूहे प्रथमस्थानेन उपांत्यचक्रे प्रवेशः

**मार्चमासस्य 4 दिनांके ऑस्ट्रेलियादलेन भविष्यति प्रथमा उपांत्यचक्रक्रीड़ा।**

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा । पुरुषाणां आईसीसी-चैम्पियन्स ट्राफी इत्यस्यां क्रिकेटक्क्रीडा स्पर्धायां उपान्त्यचक्रात् प्राक् भारत-न्यूजीलैण्डदेशयोः क्रीडा गतदिने दुबई अंताराष्ट्रीय- क्रिकेट-क्रीडांगणे भारत-न्यूज़ीलैंडदेशयोः मध्ये जाता। अस्यां भारतेन न्यूज़ीलैंडदलं 44 धावनांकैः पराजित्य प्रथमस्थानं प्राप्तम्। प्राथम्येन चयनावसरलब्धेन न्यूजीलैण्ड-देशेन भारताय प्रथमतया क्रीडावसरः दत्तः। रोहितशर्मा-शुभमन गिल-विराट-कोइलीत्यादयः शीर्षक्रमस्य क्रीडकाः आसानुरूपं न क्रीडितवन्तः पुनरपि श्रेयस अय्यर अक्षरपटेलादिभिः सथमं नवचत्वारिंशदधिकद्विशत-धावनांकाः कारिताः। ध्यातव्यमस्ति यत् अस्य संघर्षस्य परिणामेन भारतस्य उपान्त्यचक्रे क्रीडनं निर्विघ्नमेव स्थास्यति।



## सुभाषितम्

**अर्थनाशं मनस्तापं,
गृहे दुश्चरितानि च।
वञ्चा नञ्चापनं च,
मतिमान्न प्रकाशयेत्॥**

हिन्दर्थः- धन का नाश, मन की व्यथा, घर के दुश्चरित्र, कभी जीवन में खाया हुआ धोखा, वंचना, स्वयं का अपमान इन सभी बातों को मतिमान (बुद्धिशाली) मनुष्य को कभी भी किसी के सामने प्रकाशित नहीं करना चाहिए, गुप्त ही रखना चाहिए।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

## सम्पूर्ण देशे द्वादश-विभिन्नप्रकरणेषु एकोन-त्रिंशत्मादकद्रव्याणां विक्रेतारः न्यायालयेन दण्डिताः सन्ति-अमितशाहः



गृहमंत्री अमितशाहः सूचितवान् यत् सम्पूर्ण देशे द्वादशविभिन्नप्रकरणेषु एकोन-त्रिंशत् मादकद्रव्याणां विक्रेतारः न्यायालयेन दण्डिताः सन्ति। सामाजिक अन्तर्जालीय प्रसारतन्त्र-माध्यमेन श्रीशाहः अवदत् यत् नरेन्द्रमोदी सर्वकारः मादकद्रव्याणां विक्रेतृन् न्यायालयं प्रति आनेतुं प्रतिबद्धः अस्ति। सममेव श्रीशाहः प्रोक्तवान् यत् सर्वकारोऽयं मादकद्रव्याणां प्रकोपं विरुध्य अथ च मादक द्रव्यात् मुक्त भारतं कर्तुं प्रयासं करिष्यतीति।

## मतदातुः निर्धारितमतदान-केन्द्रात् परम् अन्यत्र मतदानस्य सम्भावनापि न गण्यमस्ति-निर्वाचनायोगः

निर्वाचनायोगेन स्पष्टीकृतं यत् मतदातृणां सचित्र-परिचय-पत्रस्य पुनरावृत्तेः तात्पर्यम् अनधिकृत-मतदातृत्वेन न परिगण्यते। वक्तव्यमिदं आयोगेन भिन्नयोः राज्ययोः मतपत्रयोः समानपरिचय-पत्राङ्कस्य उपब्धताविषयिक-वार्तावाहिनीषु प्रसार्यमाणानां वार्तानामुत्तरे उक्तम्। आयोगेन स्पष्ट कृतं यत् द्वयोः मतदात्रोः समानपरिचय-पत्राङ्कस्य सम्भावना अस्तीति। परं जनसांख्यिकीय-विवरणम्, विधानसभानिर्वाचनक्षेत्रम्, मतदानकेन्द्रसहितम् अन्यानि-विवरणानि समानपरिचयपत्राङ्कयुतयोः मतदात्रोः समानं न भविष्यनीति निश्चितमिति। आयोगेन एतदपि स्पष्टीकृतं यत् एकस्य मतदातुः निर्धारितमतदानकेन्द्रात् परम् अन्यत्र मतदानस्य सम्भावनापि न गण्यमस्ति ।

## उत्तराखण्डे हिमस्खलन-घटनायां मृतकानां संख्या सम्बर्ध्य अष्टसञ्जातास्ति



हिमसंस्कृतवार्ताः। उत्तराखण्डराज्यस्य चमोली-जनपदस्य माणा-ग्रामं निकषा हिमस्खलन-घटनायां मृतकानां संख्या सम्बर्ध्य अष्टसञ्जातास्ति । यतो हि अद्यापि आपदुद्धारदलेन चत्वारः शवः दुर्घटनास्थलात् निस्सारिता। हिमस्खलने अवरुद्धाः त्रयः श्रमिकाः कथंचिदपि रक्षणाय अभियानं प्रचाल्यमानमस्ति। मुख्यमन्त्रिणा पुष्करसिंहधामिना देहरादूनस्थ आपदानियन्त्रण-कक्षं सम्प्राप्य स्थितेः निरीक्षणं कृतम्। तेनोक्तं यत् सेना, भारततिब्बतसीमाप्रहरिणः, आपदुद्धारदलं समेत्य जनपदप्रशासनञ्च युद्धस्तरेण आपदुद्धारकार्ये संयुक्ताः सन्ति।

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## मुस्लिमधर्मावलम्बिनां जनानां रमजानपर्वणः शुभारम्भः जातः



रमजानपर्वणः पवित्रमासः गतदिनाद् समारब्धः। मस्जिदाख्येषु धार्मिकस्थलेषु बहवः मुस्लिमधर्मावलम्बिनो जनाः सम्मिलिताः अभवन्। रमजान इति पर्व इस्लामि पञ्चाङ्गस्य नवमः मास अस्ति। रमजानमासस्य अन्तिमे दिवसे ईद-उल-फितर इति उत्सवः परिपाल्यते। प्रधानमन्त्री नरेन्द्रमोदी रमजान पर्व आलक्ष्य जनेभ्यः शुभकामनाः प्रदत्तवान्। ध्यातव्यमस्ति यत् अरबदेशेषु रमजानमासस्य द्वितीयः दिवसः अस्ति।

## शोधः- भारते गतकतिपयवर्षेषु निर्धनता आधिक्येन न्यूनतां सम्प्राप्तास्ति

भारते गतकतिपयवर्षेषु निर्धनता आधिक्येन न्यूनतां सम्प्राप्तास्ति। एकेन नूतन-शोधपत्रानुसारेण सिद्धीकृतमस्ति यत् गते दशाब्दे सर्वाधिकतया निर्धनतासूच्याम् अपचितिः परिलक्षितास्ति। अर्थशास्त्रिणा भल्ला सुरजितेन करणभसीनेन च प्रकाशिते शोधपत्रे द्वाविंश-त्रयोविंशे, त्रयोविंश-चतुर्विंशे च वर्षे प्रकाशितयो जनानां व्ययशक्तेः समाकलनानुसारं विश्लेषणपूर्वकं निष्कर्षोऽयं निष्पादितोऽस्ति। एतेषां सर्वेक्षणानां समाकलनानुसारं भारते निर्धनतायाः स्तरे पर्याप्ततया न्यूनता आगतास्तीति सङ्केताः प्राप्यन्ते। शोधपत्रे सबलं प्रतिपादितमस्ति यत् अत्यधिक-निर्धनता प्रायशः नगण्यस्तरं यावत् अपचितास्तीति।

## विकसित भारतम् केवलं स्वप्नः नास्ति, एषः अस्माकं उद्देश्यः अस्ति-उपराष्ट्रपतिः जनदीपधनखडः

उपराष्ट्रपतिः जनदीपधनखडः प्रोक्तवान् यत् विकसित भारतम् केवलं स्वप्नः नास्ति, एषः अस्माकं उद्देश्यः अस्ति। अस्मिन् उद्देश्ये यूनः महत्त्वपूर्णां भूमिकां निर्वहन्ति। सः तिरुवनन्तपुरम्-नगरे भारतीय-विचार-केन्द्र द्वारा आयोजिते चतुर्थ्यां पी. परमेश्वरन्-स्मृति व्याख्यानमालायां भाषमाणः आसीत्। श्रीधनखडः अवदत् यत् देशे यत्किमपि भवति तत् वैश्विकरुपेण अस्मान् गौरवान्वितं करोति। सः अवदत् यत् भारतं सम्प्रति विश्वस्य पञ्चतमी अर्थव्यवस्था अस्ति तथा च शीघ्रमेव चतुर्थी बृहत्तमी वैश्विकी अर्थव्यवस्था भवितुं शक्नोति। असौ कार्यक्रमस्यास्य अनन्तरं हैदराबादं प्रति प्रस्थितवान्।

# हिमाचलकांग्रेस २० दिवसेषु काङ्ग्रेसस्य नवीनसङ्घटनस्य निर्माणं भविष्यति,नवीनेभ्यः अवसरं दास्यते



**हिमसंस्कृतवार्ताः- शिमला।**

शिमलानगरे काङ्ग्रेससङ्घटनस्य, सर्वकारस्य च विषये द्विदिवसं विचारविमर्शं कृत्वा काङ्ग्रेसप्रभारी रजनीपाटिल सर्वकारस्य कार्यस्य प्रशंसाम् अकरोत्, अपि च १५ तः २० दिवसेषु काङ्ग्रेसस्य नूतनसङ्घटनस्य निर्माणं भविष्यति इति अपि उक्तवती। नूतनकार्यकारिणी घोषिता भविष्यति, परन्तु शीर्षनेतृत्वं दलस्य अध्यक्षस्य विषये निर्णयं करिष्यति। सुक्खुसर्वकारस्य विषये सा अवदत् यत् सर्वकारः उत्तमं कार्यं कुर्वन् अस्ति, सामान्यजनेभ्यः च सम्बलं दीयते। यत्र यत्र सर्वकारे, संस्थायां च दोषाः सन्ति, ते शीघ्रमेव दूरीकृताः भविष्यन्ति।

अत्र पत्रकारान् सम्बोधयन् रजनी पाटिल हिमाचलस्य पुरातनपरम्परा समाप्ता भविष्यति इति विश्वासम् अकरोत्। अस्य सर्वकारस्य अनन्तरं काङ्ग्रेसः पुनः एकवारं सर्वकारं निर्मास्यति, भाजपायाः कृते च समुचितम् उत्तरं दीयते। सा स्वीकृतवती यत् संस्थायाः सर्वकारस्य च समन्वयस्य आवश्यकता अस्ति, यस्य कृते सा प्रयत्नान् करिष्यति। राज्यसर्वकारः निरन्तरं आर्थिककष्टानां सम्मुखीकरणं कुर्वन् अस्ति, तस्मात् बहिः गन्तुं सर्वकारः गम्भीर प्रयत्नान् कुर्वन् अस्ति। आपदाकाले अपि केन्द्रसर्वकारेण हिमाचलस्य साहाय्यं न कृतम्।

## नूतनेभ्यः अवसरं दास्यते

एकव्यक्ति-एकपदस्य सिद्धान्तस्य विषये सा अवदत् यत् तस्य पूर्णतया कार्यान्वयनम् भविष्यति। एतेन सह सत्ताधारिणां जनानां कृते अपि प्राधान्यं दीयते, ये अद्यापि न कृताः तेषां नियुक्तिः अपि अवलोकिता भविष्यति तथा च शीघ्रमेव अध्यक्षस्य उपाध्यक्षस्य च नियुक्तिः सर्वकारे क्रियते। यद्यपि सा स्वीकृतवती यत् सर्वेषां सुखं कर्तुं न शक्यते तथापि सा प्रयासं करिष्यति। सा अवदत् यत् शीघ्रमेव जिलाध्यक्षाः, खण्डाध्यक्षाः च नियुक्ताः भविष्यन्ति, नूतनानां मुखानाम् कृते अपि प्राधान्यं दीयते। हिमाचले ४० विधायकाः आसन्, अद्यापि ४० विधायकाः सन्ति, यस्मात् कारणात् सर्वकारः पूर्णतया बलवान् अस्ति।

# अमरीकादेशस्य राष्ट्रपतिनः डोनाल्ड ट्रम्पस्य समर्थनं स्वदेशस्य कृते महत्त्वपूर्णम् अस्ति-जेलेंस्की

हिमसंस्कृतवार्ताः। यूक्रेन देशस्य राष्ट्रपतिः व्लादिमिर जेलेंस्की अवदत् यत् अमरीकादेशस्य राष्ट्रपतिनः डोनाल्ड ट्रम्पस्य समर्थनं स्वदेशस्य कृते महत्त्वपूर्णम् अस्ति। व्हाइट हाउस इति स्थले प्रचलितायां अमेरिकायाः राष्ट्रपतिः उपराष्ट्रपतिः चोभयो एकस्मिन् परिचर्यायाम् एतद् वक्तव्यम् आगतम्। एकस्मिन् अन्तर्जालीय पटल सन्देश माध्यमेन राष्ट्रपतिः जेलेंस्की प्रोक्तवान् यत् रूस देशेन सह त्रिवर्षात्मके युद्धकाले अमेरिकीय सहायतार्थं यूक्रेन-देशः कृतज्ञः अस्ति। असौ अवदत् यत् राष्ट्रपतिः ट्रम्पः अस्य युद्धस्य विरामं इच्छति परञ्च कोऽपि यूक्रेनदेशं समं शान्तिं न इच्छति।

# जयरामठाकुरः २७ वर्षपूर्वम् अद्यैव विधायकः अभवत्, सामाजिकमाध्यमेषु चित्राणि प्रसारितवान्

**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**

हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्री, विपक्षनेता च जयरामठाकुरः २७ वर्षपूर्वम् अस्मिन् दिने अर्थात् २ मार्च दिनाङ्के एव विधायकः अभवत्। जयरामठाकुरः अखिल-भारतीय-विद्यार्थी-परिषदः राजनैतिकजीवनस्य आरम्भं कृतवान्। तदनन्तरं जयरामठाकुरः भारतीय-जनतायुवा-मोर्चा इत्यस्य मार्गतः भाजपायां सम्मिलितः अभवत्। विधायकः, मन्त्री, दलस्य अध्यक्षः च भूत्वा केन्द्रीयनेतृत्वेन २०१७ तमे वर्षे मुख्यमन्त्री अभवत्।

१९९३ तमे वर्षे विधानसभानिर्वाचने पराजितः जयरामठाकुरः १९९८ तमे वर्षे निर्वाचनं कृतवान्। यस्मिन् सः काङ्ग्रेसं पराजितवान्। १९९८ तमवर्षाद् अनन्तरं जयरामठाकुरः निर्वाचने निरन्तरं विजयं प्राप्य विधानसभानिर्वाचने कदापि न पराजितः।

## संयोगेन मुख्यमन्त्री अभवत्

यद्यपि २०१७ तमस्य वर्षस्य हिमाचलविधानसभानिर्वाचने भारतीयजनतापक्षः विजयी अभवत् तथापि मुख्यमन्त्रीपदस्य प्रत्याशी प्रेमकुमारधूमलस्य सुजनपुरासनतः पराजयस्य सम्मुखीकरणं कर्तव्यम् अभवत्। एतादृश्यां परिस्थितौ मण्डीमण्डलस्य सिराजासनतः पञ्चवारं विधायकं ठाकुरं मुख्यमन्त्री कृत्वा एवं प्रकारेण जयरामठाकुरः संयोगेन हिमाचलप्रदेशस्य मुख्यमन्त्री अभवत्।

## कर्णाटकस्य जामाता अस्ति जयरामठाकुरः

जयरामठाकुरस्य कर्णाटकेन सह अपि सम्बन्धः अस्ति। जयरामठाकुरः कर्णाटकस्य जामाता अस्ति। जयरामः कर्णाटकस्य शिमोगा निवासी डॉ. साधना इत्यनया सह विवाहम् अकरोत्। साधनायाः परिवारः राजस्थानस्य जयपुरं गतवान् आसीत्। विवाहात् पूर्वं सा साधनारावः आसीत्, १९८० तमे वर्षे जयपुरस्य एस.एम.एस. चिकित्सामहाविद्यालये चिकित्साध्ययनं कृतवती। साधना एबीवीपी-पक्षे अपि सक्रिया आसीत् तथा च जयरामः तदानीन्तनः पूर्णरूपेण एबीवीपी-कार्यकर्ता आसीत्, मण्डीतः निर्वाचनं कर्तुं पूर्वं जम्मू-कश्मीरे कार्यं कुर्वन् आसीत्। उभयोः अपि कन्याद्वयम् अस्ति।

## अत्यन्तं दरिद्रतायां व्यतीतः बाल्यकालः

जयरामठाकुरस्य जन्म ६ जनवरी १९६५ तमे वर्षे मण्डीमण्डलस्य तादीग्रामे अभवत्। सः प्राथमिकशिक्षा ग्रामात् एव प्राप्तवान्। सः मण्डी-नगरस्य बल्लभ-महाविद्यालयात् स्नातकपदवीं प्राप्तवान्। छात्रजीवने सः एबीवीपी- संस्थायां सम्मिलितः भूत्वा छात्रराजनीत्याः कार्यक्षेत्रस्य आरम्भं कृतवान्। तस्य बाल्यकालः अत्यन्तं दारिद्र्ये एव व्यतीतः। तस्य परिवारे त्रयः भ्रातरः भगिन्यः च सन्ति तस्य पिता कृषिकार्यं श्रमकार्यं च कृत्वा परिवारस्य पोषणं करोति स्म।

## दलस्य वरिष्ठकार्यकर्तृभिः कृता उपेक्षा

१९९३ तमे वर्षे यदा युवा जयरामठाकुरः सिराज (तदा चच्योट) इत्यस्मात् नामपत्रं प्राप्तवान् तदा दलस्य वरिष्ठनेतारः एतत् सोढुं न शक्तवन्तः। प्रायः परिवर्तनकाले एतत् भवति। अवश्यं युनां मुखानाम् अवसरः प्राप्तव्यः परन्तु वरिष्ठनेतारः तत् सहजतया न स्वीकुर्वन्ति। तस्मिन् समये जयरामठाकुरस्य अपि




तथैव अभवत्, वरिष्ठनेतारः जयरामठाकुरस्य उपेक्षां कृतवन्तः।

## युवानेतारः सर्वदा नूतनं प्रतिबिम्बं निर्मान्ति

तस्मिन् समये अपि चच्योटस्य केचन उत्साहीयुवकाः तेन सह स्कन्धेन स्कन्धं स्थित्वा निर्वाचनयुद्धे पूर्णबलेन प्रवेशं कृत्वा स्वस्य उपस्थितिं पञ्जीकृतवन्तः। अवश्यं जयरामठाकुरः प्रथमं निर्वाचनं काङ्ग्रेसनेता मोतीरामठाकुरेन सह पराजितवान्, परन्तु तदेव निर्वाचनं तस्य कृते राजनीतिषु सुवर्णभविष्यं लिखितवान् आसीत्। तदनन्तरं १९९८ तमे वर्षे निर्वाचनं जातम्, जयरामठाकुरः प्रथमं विजयं प्राप्तवान्। तदनन्तरं जयराम ठाकुरः स्वराजनैतिकयात्रायां कदापि पृठे न अवलोकितवान्। पञ्चवारं क्रमशः निर्वाचनेषु विजयं प्राप्य २०१७ तमे वर्षे मुख्यमन्त्री अभवत्।

## उत्साही-युनां सहभागिता आसीत्

यदा जयरामठाकुरः प्रथमवारं निर्वाचनक्षेत्रे प्रविष्टवान् तदा कदापि कोऽपि न कल्पितवान् स्यात् यत् सः एकस्मिन् दिने राज्यस्य बृहत्तमं पदं अर्थात् मुख्यमन्त्रीपदं प्राप्स्यति इति। १९९३ तमे वर्षे निर्वाचनविजयानन्तरं जयरामठाकुरः कदापि राजनैतिकमञ्चे पृष्ठे न पश्यति स्म। सः प्रतिदिनं नूतनाः सफलताः प्राप्तुं निरन्तरं प्रवृत्तः आसीत्। अस्मिन् वार्तायां यः फोटो अस्ति सः साक्षी अस्ति यत् जयराम ठाकुरः यदा राजनीतिं प्रविष्टवान् तदा सः सरलतां प्रेम्णा पश्यति स्म। आम्, एतत् भिन्नं यत् तस्य स्कन्धेषु समग्रस्य राज्यस्य भारस्य कारणात् सः सहकारिभ्यः बहुकालं दातुं न शक्नोति।

१९९३ तमे वर्षे विधानसभायाः नामपत्रं प्राप्य जयरामठाकुरः अनेकानि आव्हानानि सम्मुखीकृतवान्। एकतः सः राजनीतिषु नूतनः आसीत् अपरतः तस्य विधानसभाक्षेत्रस्य केचन वरिष्ठनेतारः नामपत्रस्य स्पर्धां कुर्वन्ति स्म। एतादृश्यां परिस्थितौ निर्वाचनयुद्धे स्वस्य सामर्थ्यं दर्शयितुं जयरामठाकुरस्य केवलं युवासहकारिणां समर्थनम् आसीत्। तत्कालीन मण्डल भाजपायाः अध्यक्षः हेमराज वर्मा, मंडलभाजपा महासचिवः दुलासिंहठाकुरः, सिराजस्य भाजयुमो अध्यक्षः नूतनप्रकाशः, कर्मठः भाजपा कार्यकर्ता छपेरामः सहिताः केचन् उत्साहिनः युनः तेन सह उपस्थिताः अभवन्। ते ग्रामं ग्रामं गत्वा जयरामठाकुरस्य कृते जागरूकतां जनयन्ति स्म।

तस्मिन् एव काले जयरामठाकुरः निर्वाचनप्रचारार्थं गडागुशैणी गत्वा तस्य चित्रं गृहीतवान्। जयरामठाकुरः चित्रे मध्ये उपविष्टः अस्ति। जयरामठाकुरः साधारणवस्त्रधारी मश्रुमुखः अस्ति। चित्रे चच्योटमण्डल भाजपाध्यक्षः हेमराजवर्मा दक्षिणे, महासचिवः दुलासिंहठाकुरः वामे उपविष्टे। तस्मिन् समये प्रचारार्थं साधनानां, धनस्य च अभावः आसीत्। अधुना सामाजिकमाध्यमानां युगः अस्ति। प्रचारार्थं सामाजिकमाध्यमानां बहुधा उपयोगः भवति। अधुना ग्रामात् ग्रामं प्रचारार्थं गमनम् तावत् महत्त्वपूर्णं न मन्यते जयरामठाकुरः राज्यस्य मुख्यमन्त्री अभवत् तथा च अधुना सदने विपक्षस्य नेता अस्ति।

# सिङ्गापुरस्य शिक्षाव्यवस्थायाः विषये ज्ञात्वा अन्ताराष्ट्रीय-संपर्कन-भ्रमणात् प्रत्यागताः हिमाचलप्रदेशस्य शिक्षकाः





**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।**
हिमाचलप्रदेशशिक्षाविभागेन प्रायोजितशिक्षकाणां अन्ताराष्ट्रीयशैक्षिकभ्रमणस्य अन्तर्गतं राज्यस्य ६० तः अधिकानां शिक्षकानां समूहः सिङ्गापुरे अन्ताराष्ट्रीयशिक्षणप्रविधिविषये ज्ञात्वा देशं प्रत्यागतवान्। एतेषु शिक्षकेषु जिला मण्डीतः 9 शिक्षकाः चयनिताः आसन्, येषु संस्कृतशिक्षकौ डॉ. मनोजकुमारशैलः, राजकीय-उच्च-विद्यालय बिजन-ढलवान, डॉ. विवेकशर्मा, राजकीय (बाल) वरिष्ठ-माध्यमिक-विद्यालयः जोगिन्दरनगरम्, हिन्दीशिक्षकौ मनोहरलालः, राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः सिध्यानी, पूजादेवी राजकीय- उच्च- विद्यालयः सिल्ही, टीजीटी विज्ञानम् डॉ. बलदेवसिंहः राजकीय-उच्च-विद्यालयः गेहरा, जेबीटी शिक्षकाः भीमसिंहः, कुलदीपचन्दः, अंजू बाला व दिनेश गुलेरिया, सुरेन्द्रकुमारः च आसन्। अस्य अन्तर्राष्ट्रीय- संपर्कन - भ्रमणस्य उद्देश्यं शिक्षकान् विश्वस्तरीय- शिक्षा-व्यवस्थायाः विषये अवगतं कर्तुं, तेषां शिक्षणकौशलस्य उन्नयनस्य अवसरं च प्रदातुं आसीत् अस्मिन् अन्ताराष्ट्रीयशैक्षिकभ्रमणकाले सिङ्गापुरस्य प्रिंसीपल-अकादमीद्वारा द्विदिनात्मकः अन्ताराष्ट्रीयप्रशिक्षणकार्यक्रमः आयोजितः। प्रशिक्षणकार्यक्रमे विशेषतया बालकानां रचनात्मकं तार्किकं च चिन्तनं विकसितुं २१तमायाः शताब्द्याः शैक्षिककौशलं कक्षायाः क्रियाकलापैः च सहितम् अनुभवात्मकशिक्षणं प्रदातुं बलं दत्तम्। तेन सह सिङ्गापुरस्य विद्यालयाः अपि गताः, तत्रत्याः शैक्षणिकक्रियाकलापाः अपि अवगताः। अस्मिन् अवसरे सिङ्गापुरस्य शिक्षाव्यवस्थायाः शिक्षणपद्धत्याः च आधारेण प्रश्नाः सहभागिभिः शिक्षकैः स्थानीयशिक्षकेभ्यः प्राचार्येभ्यः च पृष्टाः एकतः अध्यापकैः सिङ्गापुरस्य उत्तमशैक्षिकप्रभावस्य विषये ज्ञातं तथा च अपरतः हिमाचलप्रदेशशिक्षाविभागस्य उत्तमशिक्षणविधयः अपि शिक्षकैः सह सम्मुखीकृताः। प्रशिक्षणं प्राप्य सर्वेभ्यः सहभागिभ्यः शिक्षकेभ्यः प्रिंसिपल- अकादमीद्वारा प्रमाणपत्राणि प्रदत्तानि।

प्रशिक्षणं प्राप्य प्रत्यागतौ डॉ. मनोजशैलः, डॉ. विवेकशर्मा च उक्तवन्तौ यत् सिङ्गापुरस्य विद्यालयानां शिक्षाव्यवस्था उत्तमा प्रशंसनीया च अस्ति। तत्र प्राथमिकशिक्षायाः विषये विशेषं ध्यानं दीयते; एकस्मिन् विद्यालये १४०० छात्राः ९३ शिक्षकाः च सन्ति। शिक्षाव्यवस्थायाः उन्नयनार्थं विद्यालयेषु एकस्य प्राचार्यस्य त्रयाणां च उपप्रधानाध्यापकानां पदानाम् अनुमोदनं कृतम्। उपप्रधानाध्यापकाय प्रशासनिक- शैक्षिक- सह-शैक्षिक- क्रियाकलापानाम् उत्तरदायित्वं दत्तम् अस्ति। छात्राणां सर्वतोमुखविकासाय तान्त्रिकदृष्ट्या च सशक्तं कर्तुं प्रथमकक्षातः सूचनाप्रौद्योगिक्याः ज्ञानं दीयते, प्रत्येकस्य विषयस्य च स्वकीयः कक्षः भवति यस्मिन् विषयानुसारं कक्षायाः वातावरणं सज्जीकृतं भवति। हिमाचले अपि तस्य कार्यान्वयनार्थं प्रतिवेदनं निर्मितं भविष्यति, शिक्षाविभागस्य राज्यसर्वकारस्य च समक्षं प्रस्तुतं भविष्यति। येन हिमाचलप्रदेशः अपि देशे शिक्षाक्षेत्रे अग्रणीः भवेत्। अस्य एक्सपोजर-भ्रमणस्य मुख्यं उद्देश्यं शिक्षकान् विश्वस्तरीयशिक्षाव्यवस्थायाः विषये अवगमनं कर्तुं, तेषां कौशलं वर्धयितुं च आसीत्। अस्य कृते राज्यसर्वकारेण सिङ्गापुरस्य प्रिंसीपल- अकादम्याः सह सहमतिज्ञापनं हस्ताक्षरितम् अस्ति, यस्य अन्तर्गतं सिङ्गापुरस्य प्रिंसीपल- अकादमी अपि हिमाचलम् आगत्य शिक्षकान् प्रशिक्षयिष्यति। सर्वैः सहभागिभिः शिक्षकैः राज्यसर्वकारस्य शिक्षाविभागस्य च आभारः प्रकटितः यत् तैः शिक्षकाः छात्राः च अस्मिन् अन्तार्राष्ट्रीयशैक्षिकभ्रमणे प्रेषिताः।

## अंतर्राष्ट्रीय- शिवरात्रि मेलापके मंडी इत्यत्र सरदारपटेलस्य 150 तमजयंत्यवसरे विशेषप्रदर्शनी आयोजिता




**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।**
अंतर्राष्ट्रीय- शिवरात्रि मेलापके मंडी इत्यत्र सरदारपटेलस्य 150तम- जयंत्यवसरे विशेषप्रदर्शन्याः आयोजनं कृतम्। ऐतिहासिक- सांस्कृतिकधरोहरस्य प्रतीकाः अंतर्राष्ट्रीय- शिवरात्रिमेलापके, मंडी इत्यत्र अस्मिन् वर्षे सरदार वल्लभभाई पटेलस्य 150तम जयंत्यवसरे सरदारपटेल- विश्वविद्यालय मंडीपक्षतः विशेषप्रदर्शनी, सरदारपटेलस्य जीवनं, तस्य योगदानं, राष्ट्रीयएकतायां तस्य भूमिकां प्रदर्शयन्ती एका प्रदर्शनी आयोजिता। प्रदर्शन्याः उद्घाटनं मुख्यमंत्री, हिमाचलप्रदेश सुखविंदरसिंह सुक्खू मेलापकस्य शुभारम्भे अकरोत्। अस्मिन् अवसरे सः आयोजकेभ्यः शुभकामनाः दत्वा उक्तवान् यत् सरदारवल्लभभाईपटेलः केवलं स्वतंत्रतासंग्रामस्य महान् नेता एव न अपि तु भारतस्य अखंडतायाः सूत्रधारः आसीत्। तस्य 150तम जयंत्यवसरे इयं प्रदर्शनी युवावर्गं तस्य आदर्शैः प्रेरितं कर्तुम् उत्तमः प्रयासः अस्ति। अवसरेऽस्मिन् माननीयः चन्द्रशेखरः विधायकः धर्मपुरविधानसभाक्षेत्रं, विश्वविद्यालय कार्यकारी परिषद् विशेषरूपेण उपस्थितः आसीत्। कुलपतिः आचार्यः ललितकुमार अवस्थी अवदत् यत् सरदार पटेलस्य योगदानं केवलं राजनीतिकदृष्ट्या एव महत्वपूर्णं न अपि तु तस्य नेतृत्वे भारतं सामाजिक- सांस्कृतिकरूपेणापि संगठितम् अभवत्। तेनोक्तं यत् सरदारपटेलस्य दृढ़इच्छाशक्तिः, अनुशासनं, निस्वार्थसेवाभावश्च अद्यत्वे अपि युनां कृते प्रेरणास्रोत वर्तते। प्रदर्शनीसमन्वयकः डॉ. राकेशकुमारशर्मा अवदत् यत् प्रदर्शन्याः ध्येयः लौहपुरुषाय नमः इति अस्ति यत्र लौहपुरुषः सरदारवल्लभभाईपटेलस्य जीवनेन सम्बद्ध दुर्लभचित्राणि ऐतिहासिकप्रपत्राणि, तस्य भाषणानाम् अंशाः, तस्य जीवनस्य विभिन्नपक्षाः च आभासीय-भौतिकमाध्यमैः च प्रदर्शितम्।

## चमोलीक्षेत्रस्य माणाहिमस्खलने हिमाचलीद्वयस्य मृत्युः अभवत्



**हिमसंस्कृतवार्ताः- देहरादूनम्।**
उत्तराखण्डस्य चमोली-क्षेत्रस्य माणायां हिमस्खलनान्तर्गतं मग्नं भूत्वा द्वौ हिमाचली-सहितौ चत्वारः श्रमिकाः मृताः। मृतेषु हिमाचलप्रदेशनिवासी जितेन्द्रसिंहः मोहिन्दरपालः, मञ्जीत यादवः (उत्तराखण्डः) आलोक यादवः (उत्तराखण्डः) इति ज्ञातम् अस्ति। हरमेशचन्द (हिमाचलम्), अशोकः (उत्तरप्रदेशः), अनिलः कुमारः, अरविन्दकुमारसिंहः (उत्तराखण्डः) सहित पञ्च कार्यकर्तारः अधुनापि लुप्ताः सन्ति। सप्त हिमाचलीसहितेभ्यः षट् राज्येभ्यः ५५ जनाः हिमस्खलने निरुद्धाः स्म। शनिवासरे हिमस्खलनस्य द्वितीयदिने १७ श्रमिकाः उद्धारिताः। पूर्वं ३३ जनानां उद्धारः अभवत्। तेषु चत्वारः गम्भीररूपेण घातिताः जनाः चिकित्सायाम् एव मृताः। अद्यापि पञ्च श्रमिकाः अदृश्याः सन्ति। एतावता ५० श्रमिकाः निष्कासिताः सन्ति। निरुद्धाणां ५५ श्रमिकाणां मध्ये बिहारस्य ११, उत्तरप्रदेशस्य ११, उत्तराखण्डस्य ११, हिमाचलप्रदेशस्य ७, जम्मूकश्मीर-पञ्जाबक्षेत्रयोः १-१ जनाः सन्ति १३ श्रमिकाणां संकेतः मोबाईलसङ्ख्या च उपलब्धा नास्ति।

# भारतीयभाषासमितेः अन्तर्गतं लेखकानाम् अनुवादरूपेण संस्कृतकौशलं विद्वद्भिः अर्जितम्



**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, हरिद्वारम्।** अकादमिकसमन्वयकः भारतीयभाषासमितेः डॉ. के. गिरिधरराववर्यः, डॉ. सूर्यप्रसादः संयोजकः भारतीयभाषासंवर्धनसमितिः (संस्कृत), विषयविशेषज्ञौ डॉ. ओमशर्मवर्यः, डॉ. धनेशपीवीवर्यः, कार्यशालासमन्वयकः डा. प्रकाशपन्तः, कार्यशालासंयोजिका डॉ. मीनाक्षी रावतः, डॉ. सुमनप्रसादभट्टः च अन्येषां विदुषां सौजन्ये लेखकानाम् अनुवादकौशलक्षमतायाः विकासः गतिमानः अवर्तत्। डॉ. गिरिधरराववर्यः अस्यां कार्यशालायां कवीनां शास्त्रीयप्रोढभाषाणां सारल्यं सर्वेषां सम्मुखे उपस्थापितवान्। तैः उक्तं यत् वयं सरलमानकेन संस्कृतस्य लेखनं कुर्मः। डॉ. सूर्यप्रसादः उक्तवान् यत् संस्कृतस्य स्थितौ बहुपरिवर्तनं समाजे आगतम्। द्वाविंशतिभारतीयभाषासु एकः समूहः च तत्र शिक्षणम् तासु तासु भाषासु भवति। दयानिधिमारणस्य कथने सदने ओमबिरलामहोदयन यथा कथितं यत् संस्कृतं भारतस्य भाषा अस्ति तथैव भारतीयभाषासमितिः नवशिक्षानीतेः अनुसारेण च भाषाणां संरक्षणम् अपि प्रचलति तत्रैव संस्कृतसंवर्धनकार्यम् अपि संजायते च संस्कृतेन भारतीयभाषाणां अनुवादलेखनकार्यं संजायते। पाठ्यक्रमे भारतीयभाषासु यद्ज्ञानं विद्यते तत् सर्वं संस्कृतेन यदि अनुवादरूपेण क्रियते तु तदर्थं संस्कृज्ञानाम् आवश्यकता भवति। डॉ. निरञ्जनमिश्रवर्यः संबोधितवान् यत् एषः संस्कृतस्य स्वर्णकालः अस्ति। संस्कृतस्य बहवः ग्रन्थाः पूर्वमेव अनूदिताः आसन्, किन्तु अधुना अन्यभाषाणां संस्कृतमाध्यमेन अनुवादः प्रचलति। अस्माकं कृते एषः समयः भाषाकौशलस्य ज्ञाने अवसररूपेण उपलभ्यते।

# सर्वज्ञानाधारः *भगवाञ्छिवः* डॉ. ऋषिराज पाठकः



**हिमसंस्कृतवार्ताः- डॉ. दिनेश चौबे, उज्जयिनी**

उज्जयिनीस्थ- महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालस्य वेदविभागेन 24 फरवरी 2025 तमे दिनाङ्के आभासीयमञ्चद्वारा संस्कृतसाहित्ये शिवः इति विषये विशेषव्याख्यानस्य आयोजनं कृतम्। तत्र नवदेहलीस्थ श्यामप्रसाद- महिला- महाविद्यालयस्य संस्कृतविभागस्य सहयकाचार्यः डॉ. ऋषिराजपाठकः मुख्यवक्तारुपेण शिवरूपस्य व्याख्यानं कुर्वन् अवदत् यत् भगवान् शिवः ज्ञानदेवः सर्वविद्या-प्रवर्तकः च सः सर्वकलासम्पन्नः मंगलशक्तिसंयुक्तरूपः अस्ति। महोदयेन महामृत्युञ्जयमन्त्रं व्याख्याय मोक्षप्राप्त्यर्थं च उपायः अवदत्। कार्यक्रमस्य संरक्षकः माननीयः कुलगुरुः आचार्यः विजयकुमारसीजीमहोदयः लोककल्याणकारी विषयोपरि विशिष्टव्याख्यानस्य आयोजनाय वेदविभागस्य अभिनन्दनं कृतवान्। अध्यक्षीय उद्बोधने वेदविभागप्रमुखेन डॉ. संकल्पमिश्रमहोदयेन श्रुतेः पुराणपर्यन्तं लोकसाहित्ये च भगवतः शिवस्य रूपस्य वर्णनं कृतम्। अतिथिपरिचयः डॉ. सत्यव्रतपाण्डेयेन, संचालनं डॉ. प्रणवकश्यपेन, आभारं च डॉ. अंकितशाण्डिल्येन निवेदितम्। कार्यक्रमे डॉ. तुलसीदासपरोहा, डॉ. अखिलेशकुमारद्विवेदी अन्ये विद्वांसः, छात्राः, सामाजिकजनाः च सम्मिलिताः अभवन्।

# चातुर्मास्यश्रौतयागे वर्णिताः आनीकवतीष्टिः

## सान्तपनीयेष्टिःगृहमेधीयेष्टिः यागानां प्रायोगिकाः पक्षाः



**हिमसंस्कृतवार्ताः।** हिमाचलप्रदेशस्य हमीरपुरजनपदे भगौरग्रामे निगमागमप्रतिष्ठानन्यासद्वारा आयोजितायां सप्तदिवसीय- चातुर्मास्ययागविषयिणीप्रयोगात्मिकायां राष्ट्रियवेदकार्यशालायां चतुर्थदिने प्रातःकाले आनीकवतीष्टेः प्रायोगिकं पक्षं वर्णितमस्ति, तदनन्तरं वेदपारायणम् आचरितम्। अस्मिन्नेव सत्रे हिमाचलस्य प्रसिद्धैः विद्वान्सैः वेदविषयकाः स्वीयाः विचाराः प्रकटिता। यज्ञस्य विषये प्रतिपादयन् निगमागमप्रतिष्टानस्य अध्यक्षेण डॉ.ओमदत्तसरोचमहोदयः उक्तवान् यत् अस्यां सप्तदिवसीयसंगोष्ठ्यां चतुर्थे दिवसे सान्तपनीयेष्टिः, गृहमेधीयेष्टिः इत्यादीनाम् इष्टीनां प्रायोगिकाः पक्षाः वर्णयन्ते। तत्रैव विगतदिने चातुर्मास्ययागस्य वरुणप्रघासपर्व विशेषतया जातम्। यस्मिन् विषये प्रतिपादयन् तेनोक्तं यत् वरुणप्रघासपर्वणि नवप्रयाजाः तथा नव अनुयाजाः भवन्ति। अत्र विशेषतः वरुणप्रघासे उत्तरवेद्यां तथा च दक्षिणवेद्याम् अध्वर्युः प्रतिस्थातारौ यागं कारयतः। वरुणप्रघासयागे यजमानः श्रीमान् नवरत्नाग्निहोत्री आसीत्। ब्रह्मत्वे विराजमानः डॉ.ओंकारसेलूकरः अग्निहोत्री आसीत्। प्रतिस्थाता श्री अङ्कुरवत्समहाभागः , अध्वर्युः श्रीमान् योगेश-वारे महाभागः होतृरूपेण विष्णुपारीखमहोदयः आग्नीध्ररूपेण शिवममहोदयः आसीत्, उपर्युक्ताः एते अस्मिन् पर्वणि ऋत्विजः आसन्। वरुणप्रघासप्रयोगः आषाढपूर्णिमायां भवति। साप्ताहिके पक्षे तृतीय दिने अस्यानुष्ठनकालो भवति। यागेऽस्मिन् मुख्यरूपेण वरुणदेवतायाः कृते मेषपिष्टपशुः भवति अथ च मरुद्देवतायाः कृते मेषीपिष्टपशुर्भवति। यागान्ते पत्निसंयाजादिकं कृत्वा अवभृथेष्टये कालेश्वरपञ्चतीर्थे गत्वा तत्रेष्टिः सम्पन्ना। रात्रौ पञ्चतीर्थादागत्य लक्ष्मीनारायणमन्दिरप्राङ्गणे आरार्त्तिक्यं कृत्वा सर्वे तृतीयं रात्रिकालिकसत्रं सञ्जातम्। तस्मिन् सत्रे अध्यक्षपदे श्रीमदनलालडोगरा, मुख्यवक्ता श्रीमान् डॉ.अङ्कुरवत्सः, ब्रह्मत्वेन डॉ.ओंकारसेलुकरः, मञ्चसंचालनं श्री अनमोलोपाध्यायः अकरोत्।

# उत्तरप्रदेशसंस्कृतसंस्थाने सरलसंस्कृतभाषा-शिक्षकप्रशिक्षणस्यारम्भः अभवत्




हिमसंस्कृतवार्ताः-प्रवेशकुमारशुक्लः, लखनऊ। उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चाल्यते "गृहे गृहे संस्कृमित्योजनान्तर्गते दशदिवसीयं सरलसंस्कृतभाषाशिक्षकप्रशिक्षणकार्यक्रमस्य प्रारम्भः ०२/०३/२५ तः ११/०३/२५ पर्यन्तमेतत् कार्यक्रमः समायोजयिष्यते । कार्यक्रमस्यास्य समुद्घाटनं शनिवासरे सायंकाले अनिष्ठितम् उत्तरप्रदेशसर्वकारस्य सहयोगेन सम्पूर्णोत्तरप्रदेशे उत्तरप्रदेशसंस्कृतसंस्थानेन द्वारा विविधाः योजनाः प्रचाल्यन्ते। उद्घाटनसत्रे प्रप्रथमं जगद्व्यापनीं देवीं सरस्वतीं समर्च्य संस्थानस्य स्वागतगीतं प्रशिक्षिका कृतिमहोदया गीतवती, वैदिकमंगलाचरणं अमितपाण्डेयः , लौकिकमंगलाशासनं दीपिकामिश्रा कृतवती,गृहे गृहे संस्कृतमिति योजनायाः समन्वयकाः डा० अनिलगौतमवर्याः आगतानामतिथीनां स्वागतभाषणेन माल्यार्पणेन च स्वागतम् कृतवन्तः । संस्थानगीतं प्रशिक्षिकाः आस्थाशुक्लामहोदयाः कारितवत्यः , संस्थानस्य निदेशकाः विनयश्रीवास्तवमहोदयाः स्वाशीर्वचनैः प्रशिक्षुकान् प्रचोदितवन्तः। प्रशिक्षणसमन्वयकः धीरजमैठाणीमहोदयः कार्यक्रमस्योद्देश्यं किमिति सर्वान् बोधितवन्तः। आध्यक्षीयपदमलङ्कृताः संस्थानस्य प्रशासनिकाधिकारिणः डा० जगदानन्दझावर्याः अध्यक्षीयमुद्बोधनं प्रदत्तवन्तः । धन्यवादज्ञापनं योजना प्रभारी भगवानसिंहचौहानमहोदयः ज्ञापितम्। नटीवत्कुशलमंचसंचालनं प्रशिक्षणसमन्वयिकाः राधाशर्मामहोदयाः कृतवत्यः। अन्तिमे समुद्घाटनसत्रस्य सम्पूर्तिः शान्तिमन्त्रेण प्रशिक्षुः नैंसगौतममहोदया कारितवती।

# व्याकरणं सर्वेषु शास्त्रेषु पवित्रतमं सर्वशास्त्रोपकारकं च वर्त्तते- आचार्यः राधाबल्लभत्रिपाठी








**हिमसंस्कृतवार्ताः- डॉ. दिनेश चौबे, उज्जयिनी**
उज्जयिनीस्थमहर्षिपाणिनि संस्कृत- वैदिक- विश्वविद्यालयस्य व्याकरणविभागेन नवदेहलीस्थ केन्द्रीयसंस्कृतविश्वविद्यालयस्य आर्थिकसहयोगेन १९ फरवरी तः २५ फरवरी २०२५ दिनाङ्कं यावत् सप्तदिवसात्मिका राष्ट्रिय- शास्त्रार्थ- प्रशिक्षण- कार्यशाला आयोजिता आसीत्। कार्यशालायाः उद्घाटनं १९ फरवरी २०२५ तमे दिनाङ्के विश्वविद्यालयपरिसरे अभवत्।। आचार्य- भर्तृहरिप्रणीत- वाक्यपदीयस्य साधनसमुद्देशाधारितायाः कार्यशालायाः उद्घाटनसत्रे मुख्यातिथिरूपेण केंद्रीयसंस्कृत विशवविद्यालयस्य (प्राक्तन् राष्ट्रियसंस्कृतसंस्थानं, नवदेहली) इत्यस्य कुलपतिचराः प्रसिद्धसाहित्यकाराः, राष्ट्रपतिसम्मनिताः आचार्यराधावल्लभत्रिपाठीवर्याः उपस्थिताः आसन्। आचार्यैः स्ववक्तव्ये भाषाप्रकृतेः, बाह्यजगदुपरि आस्याः प्रभावस्य विषये उक्तं यत् आचार्यभर्तृहरिमते शब्दः शाश्वतः ब्रह्मप्राप्त्यर्थं मुख्यसाधनभूतं च अस्ति। तैः विश्वस्य अनेकेषां दार्शनिकानां पाश्चात्यविद्वान् चाऊंसकी इत्यादीनां मतं प्रकाशयन् कथितं यत् आचार्यभर्तृहरेः पूर्वं केनापि भाषाविदैः एतादृशं मतं न प्रतिपादितम्। विद्वतवर्यैः सर्वशास्त्राधारं व्याकरणम् इति स्वीकृतम्। उद्घाटनसमारोहस्य अध्यक्षाः, माननीयकुलगुरवः आचार्यविजयकुमारसीजी महोदयाः उक्तवन्तः यत् आचार्यभर्तृहरिः महान्तः दार्शनिकाः भाषातत्वज्ञाः च आसन्। तेषां वाक्यपदीयग्रन्थः भाषादर्शनत्वेन सम्पूर्णे विश्वे प्रसिद्धः अस्ति। अस्मिन् खण्डत्रयेषु लौकिकमलौकिकं च प्रतीतिः, शब्दः, स्फोटः, स्फुरणं, परिणामः च अत्र विस्तरेण प्राप्यते। विशेषातिथिवर्यैः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य आचार्यैः डॉ. प्रदीपकुमारपाण्डेयमहोदयैः वाक्यपदीयस्य काण्डत्रयस्य परिचयः, व्याकरणस्य सिद्धान्तानां दर्शनिकं महत्त्वं च प्रकाशितम्। राष्ट्रियसंस्कृतविश्व विद्यालयः, तिरुपतितः सम्प्राप्तैः व्याकरणविभागप्रमुखैः कार्यशालाप्रशिक्षकैः च आचार्य पंकजव्यासमहोदयैः उक्तं यत् भर्तृहरिः भारतीयज्ञानपरम्परायाः प्रवर्तकाः सम्पोषकाः च आसन्। तैः प्रतिभा प्रमाणरूपेण स्वीकृताः प्रतिभाभेदाः च व्याख्याताः। प्रस्तावना, अतिथिपरिचयः च कार्यशालासंयोजकैः व्याकरणविभागप्रमुखैः डॉ. अखिलेशकुमारद्विवेदीमहोदयैः प्रस्तुतः। कार्यशालायाः सञ्चालनं सहसंयोजकैः डॉ. दिनेशचौबेवर्यैः आभारं च विभागसंयोजकैः आचार्यतुलसीदासपरौहामहोदयैः प्रस्तुतम्। कार्यशालायां त्रिंशत् छात्राः शास्त्रप्रशिक्षणं प्राप्तवन्तः।

## शैवपरम्परायां वास्तुशास्त्रस्य तत्त्वानि गवेषणायाः विषयः- प्रो.काशीनाथः न्योपाने

"शैवपरम्परायां वास्तुशास्त्रस्य अवधारणा" इति विषयमवलम्य द्विदिवसीया अन्ताराष्ट्रिय- शोधसङ्गोष्ठी आयोजिता। उद्घाटनसमारोहे मुख्यातिथिरूपेण आचार्यः काशीनाथन्योपानेमहोदयः, नेपालसंस्कृतविश्वविद्यालयः काठमाण्डूतः उपस्थितः आसीत्। महोदयेन भगवान् शिवस्य स्वरूपप्रतिपादने उक्तं यत् शिवः पशुपतिः तस्य नैके रूपाः सन्ति। शिवतत्त्वस्य शास्त्रेषु विस्तृतरूपेण चर्चा कृता वर्तते। नित्यः, शुद्धः, कल्याणकारी, आशुतोषः, शिवः इति शिवस्य महिमा वर्त्तते। महाराजविक्रमादित्यस्य शासनकालस्य चर्चां कुर्वन् सः अवदत् यत् तस्य नवरत्नानि सम्पूर्णे विश्वे प्रसिद्धानि सन्ति, तेन स्थापितं विक्रमसंवत् भारतेन सह नेपालेदेशेऽपि अङ्गीकृतम् अस्ति। सारस्वतातिथिः विक्रमविश्वविद्यालयस्य पूर्वकुलपतिः प्रो. बालकृष्णशर्ममहोदयः उक्तवान् यत् भगवान् शिवः अनिष्टपरिहारको वर्तते। तेन धारितानि चिह्नानि वास्तुजन्य दोषाणां शमनार्थम् उपयुक्तानि। समराङ्गणसूत्रधारस्य चर्चायां महोदयेन कथितं यत् विना वास्तुज्ञानेन शुभाशुभ लक्षणानां ज्ञानं न भवितुमर्हति। विश्वविद्यालयस्य माननीयः कुलगुरुः प्रो. विजयकुमारसीजी महोदयः भारतीयसंस्कृतौ शैवागमस्य, मूलभूतसिद्धान्तानां चर्चां कुर्वन् अवदत् यत् शिवः एव जगतः मूलभूतचेतनातत्वरूपः बन्धनस्य मुक्तेः च कारणम्। मन्त्रवास्तु, शैववादः, शिवस्य शाश्वत सत्ता आदि विषये महोदयेन विस्तरेण उद्बोधितम्। विभागसंयोजकेन डॉ. तुलसीदास परोहेण अतिथिपरिचयः, संगोष्ठीसमन्वयकेन डॉ. शुभमशर्मेण भूमिका च प्रस्तुता। कुलसचिवेन प्रो. दिलीपसोनी महोदयेन विक्रमोत्सवस्य भव्यायोजनाय शुभकामनाः प्रदत्ताः। कार्यक्रमस्य संचालनं डॉ. विजयकुमारेण कृतम्। कार्यक्रमे डॉ. शैलेन्द्रकुमारशर्मा, प्रो. वासुदेवशर्मा, डॉ. अवधेशश्रोत्रियः, डॉ. कृष्ण कुमारभार्गवः, प्रो. प्रभाकर पाण्डेयः, डॉ. संकल्पमिश्रः, नेपाल, म्यांमार, वियतनामादि देशानां विद्वांसः, छात्राः, शोधकर्त्तारः च उपस्थिताः आसन्।

## उज्जयिन्यां राष्ट्रियशास्त्रार्थ प्रशिक्षण- कार्यशालायाःसमारोपः

समापनसत्रे मुख्यातिथिरूपेण जयपुरस्थ श्रीजगद्गुरुरामानन्दाचार्य राजस्थान- संस्कृत- विश्वविद्यालयस्य वेदविभागस्य विभागाध्यक्षचरः, आचार्यः राजेन्द्रप्रसादमिश्रवर्यः उपस्थितः आसीत्। आचार्येण स्ववक्तव्ये उक्तं यत् व्याकरणशास्त्रं मुखरूपेण स्मृतम् अस्ति। व्याकरणस्य ज्ञानस्य अभावे असाधुप्रयोगाः व्यवहारे आयान्ति। अतः व्याकरणस्य अध्ययनम् अनिवार्यरुपेण कर्तव्यम् एव। सम्प्रति महर्षिपाणिनिः, आचार्यभर्तृहरिः इत्यादीनां वैय्याकरणानां परम्परायाः संरक्षणस्य महती आवश्यकता वर्त्तते। मिश्रवर्येण भारतस्य विश्वप्रसिद्धा वाक्यार्थ परम्परायाः रक्षणार्थं छात्राः प्रेरिताः। कार्यशालायां प्रशिक्षकरूपेण उपस्थितेन तिरुपतिस्थ राष्ट्रियसंस्कृतविश्वविद्यालयस्य व्याकरणविभागस्य प्रमुखेन प्रो. पंकजव्यासमहोदयेन उक्तं यत् शास्त्राध्ययनपरम्परा प्राचीनकालात् अद्यावधिपर्यन्तं प्रचलति। सर्वेषु शास्त्रेषु वादविवादव्यवस्था वर्तते। भारतीयज्ञानव्यवस्था एतया परम्परया एव रक्षिता अस्ति। कार्यशालायाः उद्देश्यं प्रतिवेदनं च प्रस्तुवन् संयोजकेन डॉ. अखिलेशकुमारद्विवेदीमहोदयेन उक्तं यत् भर्तृहरिविरचितं वाक्यपदीयस्य साधनसमुद्देशाधा रितायां कार्यशालायां त्रिंशत् छात्राः शास्त्रप्रशिक्षणं प्राप्तवन्तः। कृतज्ञता कुलसचिवेन प्रो. दिलीपसोनी महोदयेन संचालनं च डॉ. अनुरुद्धकुमारत्रिपाठीवर्येण कृतम्। प्रो. रामसालाहीद्विवेदी, नईदिल्ली, प्रो. प्रदीपकुमार पाण्डेयः, भोपालम्, प्रो. पंकजव्यासः, तिरुपतिः, डॉ. लवलेशमिश्रः, दतिया शास्त्रप्रशिक्षणं दत्तवन्तः।

# विठूरे संस्कृतभारत्याः कर्णपुरप्रान्तस्य समीक्षागोष्ठी-डॉ. रत्नेशत्रिवेदी

हि**मसंस्कृतवार्ताः,आचार्यदीनदयालशुक्लः,कानपुरम्।** समग्रविश्वे संस्कृतस्य प्रचारप्रसाराय समर्पितं सङ्घटनं संस्कृतभारत्याः कर्णपुरप्रान्तस्य कार्यकर्तृभिः प्रान्तसमीक्षागोष्ठ्याः आयोजनं कृतम्। इयं गोष्ठी कर्णपुरस्य विठूरस्थ सुधांशु जी महाराज आश्रमे समायोजिता अभवत्। अद्य संस्कृतभारतीकानपुरप्रान्तस्य समीक्षायोजना गोष्ठी कर्णपुरस्य विठूरस्थ सुधांसु जी आश्रमे समायोजिताऽभवत्। तत्र निखिलप्रान्तस्य सर्वेऽपि दायित्ववन्तः कार्यकर्तारः समवेत्ता अभवन्। आवर्षे क्रियमाणानां कार्याणां समीक्षा तथा अग्रिमस्य आवर्षस्य पूर्वयोजना विषये कार्यकतृभिः वैचारिकमन्थनं कृतम्।सङ्घटनस्य अखिलभारतीय महामन्त्री श्री सत्यनारायणभट्टवर्यः उक्तवान् यत् अस्मिन् सम्मेलने सम्पूर्णप्रान्ततः संस्कृतभारत्याः सर्वे अपि दायित्ववन्तः कार्यकर्तारः तथा सम्भाषणशीलाः जनाश्च सम्मिलिताश्च समागत्य आगामिनि कार्ययोजनाविषये विविधसत्रेषु परिचर्चितवन्तः। पूर्वोत्तरप्रदेश क्षेत्रसंगठनमन्त्रि श्री प्रमोदपण्डितवर्योऽवदत् यत् संस्कृतभारतीसङ्घटनं आविश्वे १९८१ तमवर्षात् निरन्तरं कार्यं कुर्वदस्ति । प्रदेशे संस्कृतस्य प्रचारप्रसारे संस्कृतभारत्याः महत् योगदानं वर्तते । गोष्ठ्यां संस्कृतभारत्याः तस्याः कार्याणां परिचयः, भविष्यस्य योजना इत्येताभिः सह सांस्कृतिक कार्यक्रमाणाम् आयोजनमपि कृतम्। गोष्ठ्या स्वीकर्तारौ अखिलभारतीयमहामंत्री श्रीमान् सत्यनारायणभट्टवर्यः तथा पूर्वोत्तरप्रदेशस्य क्षेत्रसंगठनमन्त्रि श्रीप्रमोदपण्डितवर्यः समुपस्थितौ आस्ताम्। नूतनदायित्वस्य निर्वहणाय सहप्रान्तसङ्घटनमन्त्रित्वेन पूर्वतन चित्रकूटविभागसंयोजकः डॉ रत्नेश त्रिवेदीवर्यः तथा जालौनजनपदसंयोजकत्वेन सर्वेशकुमार शाण्डिल्यः, मौदहाविकासखण्ड संयोजकरूपेण मनीषदीक्षितः, औरैया जनपदसंयोजकः नितिनकुमारः, संयोजकत्वेन अखिलेशश्चेते नवीनाः चिताः । अस्मिन् कार्यक्रमे कानपुरप्रान्तस्य प्रान्तमन्त्रिआचार्यचन्द्रप्रकाशत्रिपाठिवर्यः तथा अमोलार्यः प्रो. शोभामिश्रा, सन्ध्या गुप्ता, सर्वेशशाण्डिल्य, जयनारायण शुक्ल, मनीष दीक्षित सहितं प्रान्तस्य नैके दायित्ववन्तः कार्यकर्तारः समुपस्थिताः अभवन्।